गृत्समद (आङ्गिरसः शौनहोत्रः पश्चाद्) भार्गवः शौनकः।इन्द्रः। त्रिष्टुप्।

**प्राता रथो नवो योजि सस्निश्चतुर्युगस्त्रिकशः सप्तरश्मिः।**
**दशारित्रो मनुष्यः स्वर्षाः स इष्टिभिर्मतिभी रंह्यो भूत्॥ २.०१८.०१**

प्रातः- उषसि। नवः- अभिनवः। सस्निः- शुद्धिकरः। स्ना शौचे। चतुर्युगः- युगचतुष्टययुक्तः। त्रिकशः- वाक्त्रययुक्तः। सप्तरश्मिः- भूर्भुवरादिसम्बन्धिसप्तप्रकाशयुक्तः। दशारित्रः- दशारित्रयुक्तः। मनुष्यः- ज्ञानसम्पन्नः। मन ज्ञाने। स्वर्षाः- स्वर्गसम्भक्ता। रथः- इन्द्ररथो लक्ष्यप्रापकगतिप्रतीकः। योजि- योजितः। सः। इष्टिभिः- सदिच्छाभिः। मतिभिः- मननैः। रंह्यः- रंहणशीलः। भूत्- भवतु ॥१॥

**सास्मा अरं प्रथमं स द्वितीयमुतो तृतीयं मनुषः स होता।**
**अन्यस्या गर्भमन्य ऊं जनन्त सो अन्येभिः सचते जेन्यो वृषा॥ २.०१८.०२**

सः- असौ रथो लक्ष्यप्रापकगतिप्रतीकः। प्रथमं द्वितीयमुतो तृतीयम्। अरम्- पर्याप्तः। मनुषः- मनुष्यार्थे। सः- असौ। होता- देवाह्वाता। अन्ये- ऋत्विजः। अन्यस्याः- पृथिव्याः। गर्भं- गर्भभूतमग्निम्। जनन्त- अजनयन्। सः। जेन्यः- जेता। वृषा- वर्षकः। अन्येभिः- देवैः। सचते- सङ्गच्छति ॥२॥

**हरी नु कं रथ इन्द्रस्य योजमायै सूक्तेन वचसा नवेन।**
**मो षु त्वामत्र बहवो हि विप्रा नि रीरमन्यजमानासो अन्ये॥ २.०१८.०३**

इन्द्रस्य- ईशनाधिदैवतस्य। रथे- लक्ष्यप्रापकगतिप्रतीकवाहने। हरी- आकर्षणशक्तिप्रतीकौ प्राणाश्वौ। कम्- सुखेन। नु- क्षिप्रम्। आयै- गत्यै। नवेन- अयातयामेन। सूक्तेन- सुष्ठु प्रोक्तेन। वचसा- मन्त्रेण। योजम्- योजयामि। अत्र। उ- आश्चर्ये। मा- मां च। त्वाम्- भवन्तं च। अन्ये-

Dr. Rangaraj

WEBOLIM

इतरे। बहवः। विप्राः- मेधाविनः। यजमानासः- पूजका दातारः। सु- सुष्ठु। नि- नितराम्। रीरमन्- रमयन्तु। अथवा धार्मिकेतरास्त्वां मा रमयन्त्विति भावः ॥३॥

**आ द्वाभ्यां हरिभ्यामिन्द्र याह्या चतुर्भिरा षड्भिर्हूयमानः।**

**आष्टाभिर्दशभिः सोमपेयमयं सुतः सुमख मा मृधस्कः॥ २.०१८.०४**

सुमख- सुयज्ञ। इन्द्र। द्वाभ्यां हरिभ्याम्- द्वाभ्यां प्राणाश्वाभ्याम्। आ याहि- आगच्छ। सोमपेयम्- रसानुभवं प्रति। आ हूयमानः- आहूतः सन्। चतुर्भिः षड्भिः। अष्टाभिः दशभिः। आयाहि। अयम्- एषः। सुतः- रसः। मा मृधस्कः- मा हिंस्याः ॥४॥

**आ विंशत्या त्रिंशता याह्यर्वाङा चत्वारिंशता हरिभिर्युजानः।**

**आ पञ्चाशता सुरथेभिरिन्द्रा षष्ट्या सप्तत्या सोमपेयम्॥ २.०१८.०५**

षष्ट्या। सप्तत्या। विंशत्या। त्रिंशत्या। चत्वारिंशता। पञ्चशता। हरिभिः- प्राणाश्वैः। सुरथैः। अर्वाङ्- अस्मदभिमुखः। इन्द्र। युजानः- युक्तः। सोमपेयम्- रसानुभूतिम्। आ याहि- आगच्छ ॥५॥

**आशीत्या नवत्या याह्यर्वाङा शतेन हरिभिरुह्यमानः।**

**अयं हि ते शुनहोत्रेषु सोम इन्द्र त्वाया परिषिक्तो मदाय॥ २.०१८.०६**

अशीत्या। नवत्या। शतेन। हरिभिः- प्राणाश्वैः। उह्यमानः- धृतः। अर्वाङ्- अस्मदभिमुखः। आ याहि- आगच्छ। इन्द्र- परमेश्वर। शुनहोत्रेषु- सुखेन त्वदाह्वानसम्पन्नोपासनेषु। अयम्- एषः। सोमः- रसः। ते- त्वदीयः। हि- खलु। त्वाया- त्वत्कामनया। मदाय- तृप्तये। परिषिक्तः ॥६॥

**मम ब्रह्मेन्द्र याह्यच्छा विश्वा हरी धुरि धिष्वा रथस्य।**

**पुरुत्रा हि विहव्यो बभूथास्मिञ्छूर सवने मादयस्व॥ २.०१८.०७**

Dr Ranganji
WEBOLIM

इन्द्र- परमेश्वर। मम- मे। ब्रह्म- मन्त्रं मेधां वा। अच्छ- अभिलक्ष्य। आ याहि- आगच्छ। विश्वा- सर्वान्। हरी- प्राणाश्वान्। रथस्य धुरि। धिष्व- धारय। पुरुत्रा- बहुधा। हि- किल। विहव्यः- विशेषेणाहूतः। बभूथ- बभूविथ। अस्मिन्- एतस्मिन्। सवने- सम्भजने। शूर- समर्थ। मादयस्व- तुष्टो भव ॥७॥

**न म॒ इन्द्रे॑ण स॒ख्यं वि यो॑षद॒स्मभ्य॑मस्य॒ दक्षि॑णा दुहीत।**
**उप॒ ज्येष्ठे॒ वरू॑थे॒ गभ॑स्तौ प्रा॒येप्रा॑ये जिगी॒वांसः॑ स्याम॥ २.०१८.०८**

इन्द्रेण- परमेश्वरेण। मे- मम। सख्यम्- मैत्री। न वि योषत्- मा वियुक्ता भवतु। अस्मभ्यम्- नः। अस्य- एतस्य। दक्षिणा- सामर्थ्यम्। दुहीत- दोहनं करोतु। ज्येष्ठे- प्रथमे। वरूथे- श्रेष्ठे। गभस्तौ- इन्द्रस्य बाहौ। उप- अन्तिके स्याम। प्रायेप्राये- इन्द्रस्य प्रवेशे प्रवेशे। जिगीवांसः- जेतारः। स्याम- भवेम ॥८॥

**नू॒नं सा ते॒ प्रति॒ वरं॑ जरि॒त्रे दु॑ही॒यदि॑न्द्र॒ दक्षि॑णा म॒घोनी॑।**
**शिक्षा॑ स्तो॒तृभ्यो॒ माति॑ ध॒ग्भगो॑ नो बृ॒हद्व॑देम वि॒दथे॑ सु॒वीराः॑॥ २.०१८.०९**

पूर्वं व्याख्यातम् (२.११.२१) ॥९॥

Dr. Rangaraj
WEBOLIM